दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-188 | 1 | अप्रैल 30, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लचतुर्दशी
बैशाख 17 प्रविष्ठांशः मङ्गलमयः भवेत्


2 हिमाचलसर्वकाराय उच्चन्यायालयात् महतोपशमनम् सीबीएसई-शिक्षकाणां परीक्षाविषये याचिका निरस्ता

3 HP TET 2026- विद्यालय-शिक्षा-मण्डलम् १० विषयाणाम् 'अध्यापक-पात्रता-परीक्षां' आयोजयिष्यति, समयसारिणी प्रसारिता

4 पाणिनिविश्वविद्यालये "परख पुनः पञ्चाङ्ग" अभियानस्य शुभारम्भः जातः


## सुभाषितम्

**गौरवं प्राप्यते दानात्,**
**न तु वित्तस्य सञ्चयात्।**
**स्थितिरुच्चैः पयोदानां,**
**पयोधीनामधस्थितिः॥**

अर्थात्- दान करने से गौरव प्राप्त होता है, वित्त का संचय करने से नहीं। पानी बरसाने वाले बादल आकाश में उच्च स्थान पर रहते हैं और उसका संचय करने वाले समुद्र की स्थिति नीचे रहती है।




# प्रधानमन्त्रिणा नरेन्द्रमोदिना मेरठ-नगरं प्रयागराज-नगरेण सह योजयितुं चतुर्नवत्यधिक पञ्चाशत कि. मी. सुदीर्घः गङ्गा द्रुतमार्गः उद्घाटितः





प्रधानमन्त्री नरेन्द्रमोदी उत्तरप्रदेशस्य हरदोई-मण्डले चतुर्नवत्यधिक पञ्चशत कि. मी. सुदीर्घस्य गङ्गा-द्रुतमार्गस्य उद्घाटनम् अकरोत्। जनसमूहं सम्बोधयन् प्रधानमन्त्री श्रीमोदी अवदत् यत्, गङ्गा यथा सहस्रवर्षाणि यावत् उत्तरप्रदेशस्य जीवनरेखा अस्ति, तथैव एषः द्रुतमार्गोपि अस्य राज्यस्य विकासस्य नूतन-जीवनरेखा भविष्यति। श्रीमोदी अवदत् यत् आधारभूतसंरचनाः देशस्य द्रुततरां प्रगतीं महत्त्वाकांक्षां च प्रतिविम्बयन्ति। सः अवदत् यत् गङ्गा द्रुतमार्गः उत्तरप्रदेशस्य एकं क्षेत्रं अन्येन क्षेत्रेण सह संयोजयति, येन क्षेत्रीय-सम्पर्कः महत्त्वपूर्णरूपेण संवर्धितः भवति। सः अग्रे अवदत् यत् एषा परियोजना राष्ट्रियराजधानीक्षेत्रस्य विशालान् अवसरान् परियोजनान् च राज्यस्य विभिन्नेषु भागेषु आनेष्यति। दीर्घकालं यावत् अस्य प्रदेशस्य जीवनरेखायाः गङ्गानद्याः ऐतिहासिकं महत्त्वं प्रकाशयन्, प्रधानमन्त्री अवदत् यत् तस्य समीपस्थात् आधुनिक द्रुतमार्गाः विकासस्य नूतनाः धमनयः भवन्ति। एतादृशाः परियोजनाः उत्तरप्रदेशस्य विकासाय, भारतस्य उज्वल भविष्याय च महत्त्वपूर्णा भूमिकां निर्वहन्ति इति सः अवधानं दत्तवान्।

नारीशक्ति-वन्दन-अधिनियमस्य विरुद्धे समाजवादीति दलस्य प्रधानमन्त्रिणा निन्दाकृता। अस्मिन् अवसरे मुख्यमन्त्री योगी आदित्यनाथः अवदत् यत्, प्रधानमन्त्रिणः दूरदृष्टेः अन्तर्गतं राज्ये उन्नतसंरचनायाः विकासः अभवत्। सः अवदत् यत् विगतेषु नव वर्षेषु राज्ये चतुर्लक्ष कि. मी. मार्गनिर्माणस्य विकासः अभवत्। उत्तरप्रदेश-एक्स्प्रेस्-वे-औद्योगिक-विकास-प्राधिकरणेन विकसित द्रुतमार्गः, राज्यस्य पश्चिम-मध्य-पूर्व-प्रदेशान् एकेन द्रुतमार्गेण योजयिष्यति। राज्यस्य दीर्घतमः द्रुतमार्गः मेरठ-प्रयागराजयोः मध्ये यात्राकालम् प्रायः द्वादश होरात् प्रायः षट् होरापर्यन्तं न्यूनीकर्तुं शक्नोति । प्रधानमन्त्री उत्तरप्रदेशस्य द्वि-दिवसीय यात्रायाः द्वितीयदिने प्रातःकाले श्री काशी-विश्वनाथ-मन्दिरं प्राप्य गर्भगृहे विधिवत् दर्शनं कृत्वा प्रार्थनां अकरोत्। मन्दिरात् बहिः आगमनसमये भारतीय-जनता-पार्टीतिदलस्य नेतारः तस्मै डमरु-त्रिशूलयोः उपहारं समर्पितवन्तः। ततः प्रधानमन्त्री मन्दिर-परिसरे स्थापितां विक्रमादित्य-वैदिक-घटिकां अपि अवलोकितवान्। अत्रैव सः उपस्थितैः कतिपयैः भक्तजनैः सह संवादं कृतवान्।

## सर्वकारेण केन्द्रीय-मोटर-यान-नियमान् निरूपयन्तः प्रारूप-सूचनाः प्रसारिताः




सर्वकारेण ऊननवत्यधिक ऊनविंशतिशततमस्य केन्द्रीय-मोटर-यान-नियमस्य प्रस्तावित-संशोधनानि निरूपयन् प्रारूप-सूचनाप्रकटिता अस्ति। सद्यैव प्रसारितस्याः अधिसूचनायाः अनुसारं, सर्वकारेण उच्च-इथेनाल तथा जैव-इन्धन-सम्मिश्रण-लक्ष्याणाम् अनुरूपं, उत्सर्जनस्य प्रकार-अनुमोदनस्य च मानदण्डस्य अन्तर्गतं तान्त्रिक-इन्धन वर्गीकरणे अद्यतनानां प्रारूपस्य प्रस्तावः प्रस्तावितः अस्ति। प्रारूपः अनेकानि प्रमुखानि परिवर्तनानि निरूपयति। हाईड्रोजन्-इन्धन-वाहनानां वर्गीकरणं हाईड्रोजन्-प्लस् सी. एन्. इत्यतः हाईड्रोजन् प्लस् सी. एन्. जी. इत्यनेन संशोधितम्। E-20 इन्धनेन सह संरेखितरूपेण, विशिष्ट-वर्गे स्थूल-वाहन-भारस्य सीमा त्रिसहस्र-किलोग्राम्-तः सार्द्धत्रिसहस्र-किलोग्राम्-पर्यन्तं वर्धितम् अस्ति।

## पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय मतदानम् समाप्तम्




पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय मतदानम् समाप्तम्। अस्मिन् चरणे सप्तमण्डलेषु आहत्य द्विचत्वारिन्शदधिकैक शतासनानां कृते मतदानम् अभवत्। प्रायः नवति प्रतिशतं यावत् मतदानम् अभिलिखितम्। कोलकाता, हावडा, 24 परगना इत्येतेषु मण्डलेषु मतदातृणां दीर्घ-पंक्तयः दृश्यन्ते। राज्ये मतदानं बहुधा शान्तम् एव आसीत्। शान्तिपूर्णरीत्या मतदानं सुनिश्चेतुं पर्याप्त-सुरक्षा-व्यवस्था कृता अस्ति, यद्यपि बारानगरे ई. वी. एम्-दोषस्य, नादिया-नगरे भाजपेति दलस्य मतदानाभिकर्तेः व्रयणस्य च पृथक् पृथक् घटनायाः सूचनाः प्राप्ताः सन्ति।

## देशे एल्. पी. जी. वितरकानां कृते कुत्रापि शुष्कतायाः सूचना नास्ति- सुजाता शर्मा



पश्चिम-एशियायाः स्थितौ, देशीय-एल. पी. जी. आपूर्तिः सम्पूर्ण देशे कस्यापि बाधया विनैव सुगमतया प्रचलति।

सर्वकारेण आश्वास्तिम् यत् पश्चिम एशियायाः स्थितौ, देशीय-एल. पी. जी. आपूर्तिः सम्पूर्ण देशे कस्यापि बाधया विनैव सुगमतया प्रचलति। नवदिल्ल्याम् अन्तर्मन्त्रालयीयं वार्तालापं सम्बोधयन्ती पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य सचिवः सुजाता शर्मा इत्येषा अवदत् यत् देशे एल्. पी. जी. वितरकानां कृते कुत्रापि शुष्कतायाः सूचना नास्ति। सा अग्रे अवोचत् यत् आनलाईन एल्. पी. जी. आरक्षणं तथा वितरण-प्रमाणन-कोड्-आधारितानि देशीय-एल्. पी. जी. आपूर्तयः अपि सर्वकालिकं उच्चस्तरे एव सन्ति।

## भारतीयकूटनीतिः राष्ट्रिय हितं संवर्धनाय, अस्थिर-अशान्त-वैश्विक परिस्थितौ च राष्ट्रिय-लक्ष्याणां सिद्धये पूर्णतया सज्जः- विदेशमंत्री।

विदेश-मन्त्री डॉ. एस्. जयशङ्करः उक्तवान् यत् भारतीयकूटनीतिः राष्ट्रिय हितं संवर्धनाय, अस्थिर-अशान्त-वैश्विक परिस्थितौ च राष्ट्रिय-लक्ष्याणां सिद्धये पूर्णतया सज्जः अस्ति। सः नवदेहल्याम् एकादश-योजनायाः प्रमुख-सम्मेलने भारतीय-उच्चायुक्तान्, राजदूतान्, विदेश-मन्त्रालयस्य वरिष्ठाधिकारिणश्च सम्बोधितवान्। सामाजिक माध्यमे प्रेषिते सन्देशे डॉ. जयशङ्करः अवदत् यत् एषः वार्तालापः भारतस्य वैश्विक सहभागित्वस्य महत्त्वपूर्ण विस्तारं सुस्पष्टतया रेखांकितं करोति ।

# हिमाचले पञ्चयातनिर्वाचने प्रधान-पदानां 1151 आसनानि अनारक्षितानि, 1095 पंचायताः महिलाभिः सञ्चाल्यन्ते, आरक्षणसूच्याः स्वरूपं स्पष्टम्



**हिमसंस्कृतवार्ताः- शिमला।** पञ्चायत-निर्वाचनस्य घोषणया सह हिमाचले आरक्षणसूच्याः स्थितिः अपि स्पष्टा जाता। पञ्चायतेषु प्रधानपदस्य कृते 3758 पञ्चायतेषु निर्वाचनं भविष्यति। तत्र प्रधानपदेषु अनुसूचितजातये 453 पदानि, अनुसूचित- जातिस्त्रीणां कृते 508 पदानि, अनुसूचित- जनजातये 138 पदानि, अनुसूचित- जनजाति- स्त्रीणां कृते 151 पदानि, अन्य-पृष्ठ-वर्गाय 116 पदानि, तस्य स्त्रीणां कृते 146 पदानि, सामान्य-स्त्रीणां कृते 1095 पदानि आरक्षितानि सन्ति। अनारक्षितपदेषु 1151 पदेषु प्रधान-पदस्य निर्वाचनं भविष्यति। एवं राज्ये 1900 प्रधानपदानि स्त्रीणां कृते आरक्षितानि सन्ति। राज्य-निर्वाचन- आयुक्तः अनिलखाची अवदत् यत् उपप्रधान- पदस्य कृते किञ्चिदपि आरक्षणं नास्ति।
ग्राम-पञ्चायत-सदस्यपदेषु 21678 पदानां कृते अपि निर्वाचनं भविष्यति। तेषु अनुसूचित-जातये 1813 पदानि, अनुसूचित-जाति-स्त्रीणां कृते 3811 पदानि, अनुसूचित-जनजातये 504 पदानि, अनुसूचित-जनजाति- स्त्रीणां कृते 982 पदानि आरक्षितानि सन्ति। पञ्चायत-सदस्य-पदेषु स्त्रीणां कृते 7916 पदानि आरक्षितानि, 6652 पदानि अनारक्षितानि सन्ति। पञ्चायतेषु 12709 पदेषु स्त्री-सदस्याः निर्वाचिताः भविष्यन्ति।

### 1769 पञ्चायत- समिति- सदस्य- पदानां निर्वाचनम्

राज्ये 96 खण्डेषु 1769 पञ्चायत- समिति- सदस्य-पदानां कृते निर्वाचनं भविष्यति। तेषु अनुसूचितजातये 207 पदानि, अनुसूचित- जाति- स्त्रीणां कृते 253 पदानि, अनुसूचित-जनजातये 61 पदानि, अनुसूचित-जनजाति-स्त्रीणां कृते 70 पदानि, अन्य-पृष्ठ-वर्गाय 53 पदानि, तस्य स्त्रीणां कृते 72 पदानि, स्त्रीणां कृते 524 पदानि आरक्षितानि सन्ति। अनारक्षितपदेषु 529 पदानि सन्ति। पञ्चायत- समिति- पदेषु कुलं 919 पदेषु स्त्रीणां मध्ये निर्वाचनं भविष्यति।

### 251 मध्ये 128 जिला-परिषद्-पदानि स्त्रीणां कृते आरक्षितानि

राज्ये जिला-परिषद्-निर्वाचनम् अत्यन्तं महत्त्वपूर्णं मन्यते, यत्र वित्तीय-बलं प्रचार-तन्त्रं च अधिकं प्रयुज्यते। अस्मिन् अपि आरक्षण-सूच्याः प्रभावः दृश्यते। अनुसूचितजातये 29 पदानि, अनुसूचित-जाति- स्त्रीणां कृते 35 पदानि, अनुसूचित- जनजातये 10 पदानि, अनुसूचित- जनजाति- स्त्रीणां कृते 13 पदानि, अन्य-पृष्ठ-वर्गाय 8 पदानि, तस्य स्त्रीणां कृते 11 पदानि, स्त्रीणां कृते 69 पदानि आरक्षितानि सन्ति। अनारक्षितपदेषु 76 पदानि सन्ति। जिला-परिषदः कृते 128 पदेषु स्त्रीणां मध्ये निर्वाचनं भविष्यति।

# प्रत्येककार्यकर्त्रे सम्यक् सम्मानं भविष्यति- मुख्यमंत्री सुक्खुः



**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलस्य मुख्यमंत्री सुखविंदरसिंहसुक्खुः काङ्गड़ा- जनपदे गुप्तगङ्गास्थले आयोजिते काङ्ग्रेस- दलस्य दश-दिवसीय-प्रशिक्षण-शिविरे उक्तवान् यत् दलस्य ससङ्घटनं सुदृढं सशक्तं च भवेत्, भूमौ कार्यं कुर्वतां सत्य-कार्यकर्तॄणां परिचयः भवेत्, तेषां यथोचितं सम्मानं दातव्यम्- एतत् सङ्घटनस्य सुदृढीकरणाय अत्यन्तावश्यकम्।
तस्मिन् अवसरे आयुष- युवा- सेवा- क्रीडामन्त्री यादविन्द्रसिंहगोमा, हिमाचल- पथ- परिवहन-निगमस्य- उपाध्यक्षः अजयवर्मा अपि उपस्थितौ आस्ताम्। मुख्यमन्त्रिणा उक्तं यत् कस्यापि राजनैतिकदलस्य वास्तविकशक्तिः तस्य कर्मठाः समर्पिताश्च कार्यकर्तारः भवन्ति। ते एव दलस्य विचारधारां जनसामान्यं प्रति प्रेषयितुं सशक्तं माध्यमं भवन्ति, तेषां वैचारिक-दृढतया एव सङ्घटनं सुदृढं भवति। तेन उक्तं यत् स्वातन्त्र्योत्तरकाले देशेन या तीव्रा विकास-गतिः प्राप्ता, अन्तरिक्षक्षेत्रे च या कीर्तिः स्थापिताऽभूत्, सा काङ्ग्रेसदलस्य दूरदर्शी-नीतिभिः नेतृत्वेन च सम्भविता। अस्मिन् अवसरे तेन कार्यकर्तॄन् प्रति आह्वानं कृतं यत् ते दलस्य नीतयः विचारधारां च जन-जन-पर्यन्तं प्रसारयन्तु, सङ्घटनं च अधिकं सुदृढं कर्तुं स्वीयां सक्रियां भूमिकां वहन्तु। असौ मतदानकेन्द्र- स्तरस्य राजनीतिं सुदृढीकरणाय युनां सहभागितां वर्धयितुं च सर्वान् प्रेरितवान्।

# हिमाचलसर्वकाराय उच्चन्यायालयात् महतोपशमनम् सीबीएसई-शिक्षकाणां परीक्षाविषये याचिका निरस्ता




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचल-उच्चन्यायालयः राज्यस्य सर्वकारी- विद्यालयानां सीबीएसई-प्रणाल्यां परिवर्तनस्य तथा शिक्षकानां नवीनस्य 'सब-कैडर' (उप-संवर्गस्य) निर्माणस्य सर्वकारस्य निर्णयं पुष्टीकृतवान् अस्ति। न्यायमूर्तिः विवेकसिंहठाकुरः, न्यायमूर्तिः रञ्जनशर्मा इत्यनयोः खण्डपीठेन 'जॉइंट टीचर्स फ्रन्ट' इत्यस्य अन्यासां च याचिकानां खण्डनं कुर्वन् सर्वकारस्य नीतिः वैध घोषिता। न्यायालयेन स्पष्टीकृतं यत् सीबीएसई-विद्यालयेषु नियुक्तये सेवारतशिक्षकानां कृते आयोजिता लिखितपरीक्षा परामर्शप्रक्रिया च तर्कसङ्गता पारदर्शिनी च अस्ति।

## निर्णयस्य प्रमुखाः अंशाः-

- सर्वकारस्य अधिकारः- न्यायालयः अमन्यत यत् अनुच्छेद १६२ अन्तर्गतं शिक्षासु उत्कृष्टतां निरन्तरतां च स्थापयितुं शिक्षकानां समर्पितस्य उप-संवर्गस्य निर्माणाय सर्वकारस्य पूर्णः अधिकारः अस्ति।
- चयनप्रक्रिया- चयनप्रक्रिया निष्पक्षा, न्यायसङ्गता, पारदर्शिनी च अस्ति। न्यायालयः अवदत् यत् अधिसूचनायाः कण्डिका ५.५ कस्यापि नियमस्य उल्लङ्घनं न करोति।
- परिणामघोषणा- अस्मात् निर्णयात् परं सर्वकारः ५ मार्च दिनाङ्के आयोजितायाः 'स्क्रीनिंग' परीक्षायाः परिणामं घोषितुं शक्ष्यति। तदनन्तरं योग्यताधारेण शिक्षकानां नियुक्तिः भविष्यति।
- लाभः- अनेन प्रदेशस्य १३४ तः अधिकेषु सर्वकारीयविद्यालयेषु सीबीएसई-पद्धत्या पठन- पाठनं सुचारुरूपेण आरब्धं भविष्यति।

### याचिकाकर्तॄणां तर्कः न्यायालयस्य टिप्पणी च-

याचिकासु तर्कः दत्तः आसीत् यत् एषा प्रक्रिया "वर्गे वर्गनिर्माणम्" इव अस्ति, परन्तु न्यायालयेन उक्तं यत् एषा प्रक्रिया स्वैच्छिकी अस्ति, अस्याः कोऽपि सेवाहितस्य हानिः न भविष्यति।

## शिक्षकाणां मुख्यचिन्ता आसीत् यत्-

1.अनुभविनां शिक्षकानां नवीनशिक्षकैः सह लिखितपरीक्षा अयोग्या अस्ति।
2.असफलतायाः कारणेन शिक्षकानां मनोबलं न्यूनं भविष्यति।
3.पदोन्नत्यां बाधा भविष्यति।

न्यायालयस्य उत्तरम्- न्यायालयः अवदत् यत् सर्वकारेण पूर्वमेव स्पष्टीकृतं यत् एतेषां शिक्षकाणां 'लियन' मूलसंवर्गे सुरक्षितं स्थास्यति। तेषां ज्येष्ठतायां पदोन्नत्यां वा किमपि प्रतिकूलं प्रभावं न भविष्यति। लोकहितं व्यक्तिगतकष्टात् उपरि न्यायालयेन स्वनिर्णये उक्तं यत् केषाञ्चित् शिक्षकानां वैयक्तिककष्टं वा स्थानान्तरणस्य भयं वा व्यापकलोकहितस्य मार्गे बाधा न भवितुं शक्नोति। राष्ट्रियशिक्षाप्रणाल्याः (2020) अन्तर्गतं विद्यालयान् उत्कृष्टताकेन्द्ररूपेण विकसितुं सर्वकारस्य नीतिगतनिर्णयः अस्ति, यस्मिन् न्यायिकहस्तक्षेपस्य सीमा अतीव परिमिता अस्ति।

# शिमलायां प्रतिकूलं वातावरणं धर्मशालायां स्थितः मुख्यमंत्री

मङ्गलवासरे मुख्यमंत्री सुखविंदरसिंहसुक्खुः शिमलानगरं गन्तुम् अभिलषितवान्, किन्तु दूषित- वातावरण-स्थितेः कारणात् तस्य उदग्रयानं गग्गल-विमानपत्तने एव निरुद्धम्। भारतीयविमानपत्तन-प्राधिकरण-अधीनस्य अस्य नागर-विमानपत्तनस्य निदेशकः अमित सकलानी अवदत् यत् शिमलां दूषित-वातावरणस्य कारणात् मुख्यमन्त्रिणः उदग्रयानं गग्गल-विमानपत्तने एव स्थितम्। ततः अनन्तरं मुख्यमंत्री धर्मशालानगरं प्रति प्रस्थितवान्।

## ओबीसी-ईबीसी-डीएनटी छात्रेभ्यः उच्चस्तरीयायै शिक्षायै २४२ कोटिरूप्यकाणि निर्गतानि

सर्वकारेण अन्य-पिच्छडा-वर्ग (OBC), आर्थिक-दृष्ट्या दुर्बल-वर्ग (EBC) तथा च विमुक्त-घुमन्तु-अर्धघुमन्तु-जनजाति (DNT) वर्गाणां छात्रेभ्यः उच्चस्तरीय-शिक्षा-योजनान्तर्गतं द्विचत्वारिंशदधिक-द्विशत (२४२) कोटि-रूप्यकाणां राशिः निर्गता। सामाजिक-न्याय-अधिकारिता-मन्त्री वीरेन्द्र कुमारः उक्तवान् यत् अस्याः पहल-योजनायाः उद्देश्यम् एतेषां समुदायानां छात्राणां गुणात्मक-शिक्षायां सुलभतायाः संवर्धनं तथा च तेषां शैक्षणिक-प्रगतिं प्रोत्साहितुं वर्तते। तेन सूचितं यत् वित्तवर्षे २०२५-२६ मध्ये ओबीसी-कल्याणकारी-योजनानां व्यये ३६.९६ प्रतिशतं यावत् उल्लेखनीया वृद्धिः अभवत्। श्री कुमारः अवदत् यत् एषा वृद्धिः लाभार्थिनां कृते शैक्षणिक-सहायतायाः तथा लक्षित-कल्याणकारी-योजनानां निरन्तर-विस्तारं दर्शयति।

# HP TET 2026- विद्यालय-शिक्षा-मण्डलम् १० विषयाणाम् 'अध्यापक-पात्रता-परीक्षां' आयोजयिष्यति, समयसारिणी प्रसारिता




**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलप्रदेश-विद्यालय- शिक्षामण्डलेन जून २०२६ मासे आयोज्यमानायाः १० विषयाणां अध्यापक- पात्रता-परीक्षायाः समयसारिणी प्रसारिता। परीक्षायां भागं ग्रहीतुम् अभ्यर्थिनः ३० अप्रैलतः १५ मई दिनाङ्कपर्यन्तम् 'ऑनलाइन' माध्यमेन आवेदनं कर्तुं शक्नुवन्ति। एतद् आवेदनं 'स्पेशल एजुकेटर' (विशेषशिक्षकः) पूर्वप्राथमिकतः पञ्चमकक्षापर्यन्तं, 'स्पेशल एजुकेटर' षष्ठकक्षातः द्वादश-कक्षापर्यन्तं, टीजीटी-कला, टीजीटी-विज्ञानं, जेबीटी, टीजीटी-संस्कृतं, पञ्जाबी, उर्दू, टीजीटी-गणितं, टीजीटी-हिन्दी इति विषयाणां कृते भविष्यति।

**७ दिनाङ्कतः २१ जून २०२६ पर्यन्तं भविष्यन्ति परीक्षाः**

बोर्डद्वारा प्रसारितानुसारं परीक्षाः ७ जूनतः २१ जून २०२६ पर्यन्तम् आयोजयिष्यन्ते। अभ्यर्थिनां प्रवेशपत्राणि परीक्षायाः दिनचतुष्टयं पूर्वं बोर्ड संस्थायाः आधिकारिक-जालपुटे अपलोड कृतानि भविष्यन्ति। आवेदनकर्तृभिः विवरणिका (आयोजयिष्यति) आवेदनार्थं बोर्ड-जालपुटस्यैव प्रयोगः करणीयः। निर्धारित- अन्तिमतिथेः (१५ मई) पश्चाद् अपि आवेदनं कर्तुं शक्यते, किन्तु एतदर्थं विलम्बशुल्करूपेण ६०० रूप्यकाणि दातव्यानि भविष्यन्ति।

**ऑनलाइन-माध्यमेन भविष्यति परीक्षा-शुल्कस्य प्रदानाम्**

परीक्षा-शुल्कं केवलम् 'ऑनलाइन' माध्यमेन एव स्वीकरिष्यते। एतदतिरिच्य अभ्यर्थिनां पार्श्वे १९, २० मई दिनाङ्कयोः स्व-आवेदनपत्रेषु त्रुटि- निवारणस्य अवसरः भविष्यति। अस्मिन् अन्तराले श्रेणी-उपश्रेणी- संशोधनार्थं अभ्यर्थिभिः स्वयं बोर्ड-कार्यालयं गत्वा 'ऑफलाइन' माध्यमेन आवश्यकानि प्रपत्राणि प्रस्तोतव्यानि भविष्यन्ति। शिक्षा-मण्डलानुसारं टेट- परीक्षाः सत्रद्वये आयोजयिष्यन्ते। प्रथमं सत्रं प्रातः १० वादने तथा द्वितीयं सत्रम् अपराह्ने २ वादने आरप्स्यते।

## कस्मिन् दिने का परीक्षा?

७ जून प्रातः- पूर्व-प्राथमिक-विशेष-शिक्षकः, सायम्- षष्ठ-कक्षातः द्वादश-कक्षापर्यन्तं विशेष- शिक्षकः।
१३ जून- प्रातः- टीजीटी-कला (Arts), सायम्- टीजीटी- मेडिकल।
१४ जून- प्रातः- जेबीटी, सायम्- टीजीटी- संस्कृतम्।
१७ जून- प्रातः- पञ्जाबी, सायम्- उर्दू।
२१ जून- प्रातः- टीजीटी-नॉन-मेडिकल, सायम्- टीजीटी- हिन्दी।

# सुक्खु-सर्वकारः राजकीय-यन्त्राणां दुरुपयोगं करोति, आयोगः संज्ञानं स्वीकुर्यात्





**हिमसंस्कृतवार्ताः- मण्डी।** पूर्वमुख्यमन्त्री वर्तमान-प्रतिपक्षनेता च जयरामठाकुरः आरोपं कृतवान् यत् वर्तमानः काङ्ग्रेस- सर्वकारः आदर्श- निर्वाचन-आचारसंहितायाः उल्लाङ्घनं कृत्वा स्वकीयेभ्यः लाभं प्रदातुं मित्राणां च संरक्षणं कर्तुं व्यग्रा अस्ति। तेन स्पष्टीकृतं यत् सम्पूर्णे प्रदेशे निर्वाचनस्य वातावरणं वर्तते नियमाश्च प्रभाविनः सन्ति। अस्मिन् अन्तराले सर्वकारः पृष्ठतः अवैधानिक- प्रवृत्तीः कार्यान्वितं करोति। मण्डी-नगरात् प्रसारिते वक्तव्ये प्रतिपक्षनेत्रा उल्लिखितं यत् सर्वकारस्य विविधेपु मण्डलेषु निगमेषु च नियुक्ताः पदाधिकारिणः राजकीय-संसाधनानां जनधनस्य च दुरुपयोगं कृत्वा निर्वाचन-प्रचारे सल्लग्नाः सन्ति। निर्वाचन- आयोगेन तत्काले संज्ञानं स्वीकृत्य एतेषाम् अधिकारिणां पदाधिकारिणां च प्रवृत्तीषु रोधः करणीयः। 'बाह्याधारेण' (Outsource) संस्थानां माध्यमेन अनुद्योगिभ्यः नियुक्त्याः प्रलोभनं दीयते। सराज-क्षेत्रस्य छतरी-प्रवासकाले तेन उक्तं यत् काङ्ग्रेस-दलस्य लघुनेतारः अपि सर्वकारस्य भयं प्रदर्श्य निर्वाचने अनुचित-मार्गाणाम् आश्रयं गृह्णन्ति। यदि एतत् एव प्रवर्तते, तर्हि भाजपा न केवलं निर्वाचन-आयोगे अस्य उपालम्भं करिष्यति, अपि तु 'जनतायाः न्यायालये' अपि सर्वकारस्य सत्यतां प्रकटीकरिष्यति। सर्वकारः पूर्वमेव निर्वाचने पराजयं स्वीकृतवान् अस्ति। अधुना 'धनबलेन' निर्वाचनं प्रभावितं कर्तुं यत्नाः क्रियन्ते। भाजपा-दलेन स्थानीय-निकाय-निर्वाचनाय बहुषु स्थानेषु अधिकृताः प्रत्याशिनः घोषिताः, शीघ्रमेव सर्वेषु स्थानेषु नामानि प्रकटीकरिष्यन्ते। पूर्वमुख्यमन्त्री प्रतिपक्षनेता च जयरामठाकुरः बुधवासरे सराजक्षेत्रस्य छतरीमध्ये देवता-श्रीनाग- चपलान्दु- पनाहार महोदय इत्यस्य सान्निध्ये आयोजितायां 'श्रीमद्भागवत- पुराण- कथायाम्' उपस्थिताः अभवन्, कथां च श्रुतवान्।

# "स्वामी- विवेकानन्द- कनिष्ठ- महाविद्यालयस्य एकादश- श्रेणी- विद्यार्थिनाम् उज्ज्वलम् यशः"




**हिमसंस्कृतवार्ताः- अर्जुन शास्त्री, जलगांवनगरम्।** जलगांव-नगरस्थिते के. सी. ई. सोसायटी- संचालिते स्वामी- विवेकानन्द- कनिष्ठ- महाविद्यालये, मूलजी जेठा महाविद्यालय-प्राङ्गणे, शैक्षणिकवर्षे २०२५–२६ इत्यस्य एकादश-श्रेण्याः वार्षिकपरीक्षायां विद्यार्थिनः उत्कृष्टं यशः सम्पादितवन्तः। "कीर्तिध्वजः परम्पराणां, गौरवम् अस्माकं गुणवत्तायाः" इति संस्थायाः ध्येयवाक्यं यथार्थतया साकारितम्।

- **विज्ञान-शाखा**-विज्ञान-शाखायां शिंदे स्वरूप सन्तोषः ९६.६७% अङ्कैः प्रथम-स्थानं प्राप्तवान्। लोहिया खुशी वसन्तकुमार (९६.५%) द्वितीयस्थानं, पाटील ऋतिका पंकज (९६.१७%) तृतीयस्थानं प्राप्तवती। एतेषां विद्यार्थिनां उत्कृष्टप्रयत्नैः शाखायाः कीर्तिः वर्धिता।
- **वाणिज्य-शाखा**-वाणिज्य-शाखायां ललवानी तनय कांतिलालः ९५.८३% अङ्कैः प्रथमः अभवत्। कुलकर्णी कुश मंगेशः, मलिक तनिया प्रज्ञा, मुंधा एकता पुष्कुमार च ९५.१७% अङ्कैः द्वितीयस्थानं प्राप्तवन्तः। बोरा लक्ष्मी संजयः, व्यास आदिती च योगेश ९५% अङ्कैः तृतीयस्थानं प्राप्तवन्त्यौ। एषा शाखा अपि गुणवत्तायाः उत्कृष्टं उदाहरणं प्रदर्शितवती।
- **कला-शाखा**-कला-शाखायां चौधरी वैष्णवी प्रमोद ९४.६७% अङ्कैः प्रथमस्थानं प्राप्तवती। चौधरी निकिता सुनील (९४%) द्वितीयस्थानं, हेडा उन्नती राहुल (९३%) तृतीयस्थानं प्राप्तवती। कलाशाखायाः विद्यार्थिनः अपि स्वपरिश्रमेण उल्लेखनीयं यशः अर्जितवन्तः।

**यशस्य मूलकारणानि-**

अस्य उत्कृष्ट-परिणामस्य पृष्ठभूमौ- विद्यार्थिनां सतत-परिश्रमः, पालकानां प्रेरणा, शिक्षकाणां सम्यक् मार्गदर्शनम् एतानि प्रमुखानि कारणानि सन्ति। महाविद्यालये शैक्षणिकगुणवत्ता, व्यक्तित्वविकासः, अनुशासनम्, स्पर्धात्मकवातावरणं च विशेषतया संवर्ध्यते। अस्मिन् यशसि- प्राचार्यः प्रा. एस. एन. भारंबे, उपप्राचार्यः प्रा. आर. बी. ठाकरे, पर्यवेक्षिका प्रा. सौ. स्वाती बऱ्हाटे च एतेषां महत्त्वपूर्णं मार्गदर्शनम् आसीत्। प्रा. उमेश पाटील (कला- वाणिज्य-समन्वयकः), प्रा. गुणवंतबंजारी (विज्ञानसमन्वयकः) एतेषां सततप्रयत्नैः विद्यार्थिनः प्रेरिताः अभवन्। संस्थायाः अध्यक्षः 'प्रज्ञावंत नंदकुमार जी. बेंडाळे अवदत्- "शिक्षणेन सह कौशलविकासः, अनुसन्धानम्, मूल्यशिक्षणं नियुक्तिसुविधा एतानि अस्माकं प्रमुखानि ध्येयानि सन्ति।

**सत्कारसमारोहः**-अस्य उल्लेखनीययशसः निमित्तं गुणवतां विद्यार्थिनां सम्मानसमारोहः महाविद्यालये आयोजितः। अस्मिन् अवसरे शिक्षकाः, कर्मचारिणः च उपस्थिताः आसन्, विद्यार्थिनाम् उज्ज्वल- भविष्याय शुभाशयाः प्रदत्ताः। स्वामी- विवेकानन्द- कनिष्ठ-महाविद्यालयस्य एषा सफलता न केवलं संस्थायाः, अपि तु सम्पूर्णस्य जलगांव-प्रदेशस्य गौरवम् वर्धयति। गुणवत्तापूर्ण- शिक्षणस्य एषा परम्परा भविष्येऽपि अविच्छिन्ना भविष्यति इति दृढः विश्वासः व्यक्तः।




# संस्कृतं मधुरं सदा

जगदिदम् अत्यन्तं रहस्यपूर्णम्। एतत् केन सृष्टं, किमर्थम्, अस्य का आवश्यकता वा इति विषये सहजतया न किमपि ज्ञायते। येन रहस्यमयमिदं जीवजगदादिकं सृष्टं, तत्र साधारणं, सामान्यं वा तत्त्वं स्यात्कदाचिदपि। महर्षिशास्त्रादिभिः महाशक्तिमान् परमात्मा इति वा नाम्ना स ख्यातो वर्तते। जीवजगति मनुष्यः कश्चन विवेकयुक्तः प्राणी कथ्यते। तस्य विषयेऽत्र किञ्चिद् विविच्यते। अनादिकालतो जीवः स्वकीये अर्थात् वैयक्तिके सुखे हिते वा तत्परः सन् जगति प्रवर्तमानोऽस्ति। अतः 'मत्पार्श्वे सुखं स्यात्, मम आदरो भवतु, सम्मानो भवतु, मम नाममहिमा लोके प्रसरतु, मम हितं स्यात्, मत्कल्याणं भवेत्, मन्मुक्तिः स्यात्, मया ईप्सितं सर्वं सिद्ध्येत्' इत्येवं प्रकारेण, चिन्तनेन वा संसारं हि श्वपार्श्वे आक्रष्टुं तस्य स्वभावः सदैव तत्परो भवति। एतस्य स्वभावस्य कारणतः तस्मिन् कामना, ममता, आसक्तिः इत्यादीनां वृद्धिरेवं दृढता जायमाना, बर्धमाना च स्यात्। परन्तु आत्मकल्याणं तु कामनादीनां दूरीकरणाद्धि सिद्ध्यति। अतः संसारं प्रति जीवस्य य आकर्षणजन्यः स्वभावः, तस्य दूरीकरणार्थं सर्वप्राणिनां हिते रतिः, प्रीतिर्वा परमावश्यकी। अर्थात् 'प्राणिमात्रं सुखं प्राप्नुयात्, नात्र कोऽपि दुःखी भवेत्, सर्वेषाम् आदरसत्कारादिकं भवेत्, सर्वेषां कल्याणं स्यात्, सर्वेषां परमात्मप्राप्तिः सम्भवेत्।' इति एतादृशो भावः अत्यन्तम् आवश्यकः। एतादृशात् सर्वहितकारिभावात् संसाराकर्षणं शनैः दूरीभवितुम् अर्हेत्। यदा एवम् अन्तःकरणे स्थितः प्राक्तनः परिच्छिन्नताभावो नश्यति, तदा परमात्मप्राप्तिरपि अवश्यं सम्भवति- "ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः।" इति गीतावचनात्। एवं जीवस्य अन्तःकरणे 'अहं ब्रह्मास्मि' इति भावो जागर्ति। तस्मात् तदा सांसारिकी अहंता, ममता इत्यादिभावः पूर्णतो विलयतां गन्तुमर्हेत्। एतादृशो जीवो हि कृतकृत्यो, दुर्लभश्च कथ्यते लोके इति। शुभम्।



# "लौकिकन्यायकोशः"
## "इषुवेगक्षयन्यायः"

धानुष्कः वेगेन बाणान् मुञ्चति सः वेगः क्रमेण न्यूनः भवति। मनुष्यः आरम्भे बलेन कार्यं करोति ततः प्रतिदिनम् उत्साहः न्यूनः भवति। आरम्भस्य बलं किं वा उत्साहः शनैः न्यूनः भवति।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**

# पाणिनिविश्वविद्यालये "परख पुनः पञ्चाङ्ग" अभियानस्य शुभारम्भः जातः



**हिमसंस्कृतवार्ताः – डॉ.विजयकुमारः**
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य ज्योतिर्विज्ञानविभाग द्वारा "परख पुनः पञ्चाङ्ग" इति नामकस्य अभियानस्य शुभारम्भः कृतः। विश्वविद्यालयस्य माननीयकुलगुरुः आचार्यः शिवशङ्करमिश्रेण उक्तं यत् अस्य अभियानस्य प्रमुखोद्देश्यः ज्योतिषशास्त्रस्य प्रमाणिकतां समाजे प्रचारयितुं तथा पञ्चाङ्गस्य वैज्ञानिकतां आधुनिकरूपेण प्रसारयितुं च अस्ति। कुलगुरुणा उक्तं यत् संवत्सरफलम्, मासफलम्, ग्रहणफलम्, सङ्क्रान्तिफलम् इत्यादीनि प्रायः सर्वेषु पञ्चाङ्गेषु प्रकाशितानि भवन्ति, किन्तु पञ्चाङ्गवाचनपरम्परायाः संकुचितत्वात् जनसामान्यस्य तत्र विशेषः ध्यानाभावः दृश्यते। वैश्विकपरिदृश्ये बहूनां घटनानां अनन्तरं दृष्टं यत् तासां घटनानां सङ्केताः पूर्वमेव पञ्चाङ्गेषु निर्दिष्टाः आसन्। ज्योतिषफलादेशानां प्रमाणिकतां समाजे प्रकाशयितुं विश्वविद्यालयस्य ज्योतिर्विज्ञानविभागेन "परख पुनः पञ्चाङ्ग" इति अभियानस्य योजना कृताऽस्ति। अस्मिन् अभियाने प्रतिमासस्य पूर्णिमातिथौ वा कस्यचित् महत्वपूर्णस्य घटनाक्रमस्य अनन्तरं छात्राः पूर्वछात्राश्च पञ्चाङ्गस्य मुखपृष्ठस्य सन्दर्भितपृष्ठस्य च चित्रैः सह स्वविश्लेषणं #परख_पुनः_पञ्चाङ्ग तथा #jyotirvigyana.mpsvv.ujjain इत्येतयोः सूचकचिह्नयोः सह सोशलमीडिया इत्यस्य माध्यमेन प्रचारः प्रसारश्च करिष्यन्ति । यदि कश्चन घटनाक्रमः पञ्चाङ्गे स्पष्टतया निर्दिष्टो न भवेत्, किन्तु तस्मिन् काले ग्रहस्थितयः तस्य सङ्केतं कुर्वन्ति वा फलादेशे किञ्चित् वैषम्यं दृश्यते, तर्हि तस्य कारणं निर्दिश्य विश्लेषणं कर्तुं शक्यते। प्राकृतिकघटनानां सन्दर्भे संहिताज्योतिषाधारिताः फलादेशाः अपि सम्यग्विश्लेषितुं शक्यन्ते। उत्कृष्टानि प्रमाणिकानि च विश्लेषणानि विश्वविद्यालयस्य सोशलमीडिया पटलेऽपि प्रकाश्यन्ते। अभियानस्य समन्वयनं ज्योतिर्विज्ञानविभागेन क्रियते। विभागीयप्राध्यापकाः छात्राणां मार्गदर्शनं कुर्वन्तः तान् अस्मिन् अभियाने सहभागीभावेन प्रेरयन्ति। विभागाध्यक्षः उक्तवान् यत् कुलगुरोः मार्गदर्शनेन अयं अभियानः जनसामान्येषु पञ्चाङ्गे प्रति रुचिवृद्धिं जनयिष्यति इति।



**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य काश्चन विचित्राः वार्ताः श्रुताः मया। प्रथमं तावत् एकेन वितरकेन आपत्काले महती सहायता कृता। तेन एकस्य गृहस्य उद्घाटितं द्वारं दृष्टम्। गृहस्वामिनी यावत् न प्रत्यागता, तावत् तेन तत्र स्थित्वा द्वारं रक्षितम्।

**नन्दिनी-** सुष्ठु उक्तम्। तेन वितरकेन स्वस्य कर्तव्यं पालितम्। एतादृशं परोपकारं दृष्ट्वा मनः प्रसीदति। नागपुरनगरे अपि एका अन्या परोपकारिणी वार्ता अस्ति। तत्र 'तक्र-माता' इति प्रसिद्धा एका वृद्धा अस्ति। उष्णकालस्य तापेन पीडितेभ्यः जनेभ्यः तया तक्रं दत्तम्। सा निःस्वार्थभावेन सेवां कृतवती अस्ति।

**काव्या-** सत्यम्, सा माता सर्वैः वन्द्या। तस्याः सेवाभावः अनुकरणीयः। किन्तु नन्दिनि, विदेशात् एका नूतना परन्तु खेदकरी वार्ता आगता। न्यूयार्कनगरे भारतीय-दम्पतिभ्याम् स्वविवाहोत्सवे 'बारात' इति शोभायात्रायाः कृते प्रसिद्धः 'पञ्चम वीथी' मार्गः एव अवरुद्धः। अनेन अन्येषां नागरिकाणां मार्गः बाधितः। एतादृशं प्रदर्शनं तु अनुचितं कृतम्।

**नन्दिनी-** आम्, अन्येभ्यः कष्टं दत्त्वा उत्सवः न करणीयः। एतादृशाः वार्ताः अस्मान् विचारयन्ति। अस्तु, अन्ते केदारनाथ-यात्रायाः एका शुभा वार्ता अस्ति। तत्र यात्रा-मार्गे द्वे वृद्धे भगिन्यौ दृष्टे। तयोः वयः अधिकम् अस्ति, तथापि ताभ्यां केदारनाथं प्रति महता उत्साहेन यात्रा कृता। तयोः अदम्यं साहसं सर्वेभ्यः प्रेरणादायकं वर्तते।

**काव्या-** सत्यम्। तयोः ईश्वर-भक्तिः अद्वितीया। अद्यतन-वार्ताभिः वयम् एतद् अवगतवन्तः स्मः यत् जीवने सेवा साहसं च आवश्यके स्तः। नमो नमः।

# जम्मू-कश्मीरस्य उपराज्यपालः मनोज सिन्हा आगामि-अमरनाथ-यात्रा-सज्जतायाः-समीक्षा-सभायाः अध्यक्षतां कृतवान्

जम्मू-कश्मीरस्य उपराज्यपालः मनोज सिन्हा जम्मू-नगरस्य लोकभवने उच्च-स्तरीय-सुरक्षा-समीक्षा-सभायाः अध्यक्षतां कृतवान्। अस्यां सभायां विद्यमान-सुरक्षा-स्थितेः मूल्याङ्कनम् अभवत् तथा च आगामि-अमरनाथ-यात्रा-सज्जतायाः समीक्षा जाता । अस्मिन् अवसरे वरिष्ठाः आरक्षी-प्रशासनिकाधिकारिणः, आरक्षी महानिदेशकः नलिन-प्रभातः च सह उपस्थिताः आसन्।

# मध्यप्रदेशस्य धार-मण्डले भीषणं यान-दुर्घटना, चतुर्दश जनानां मृत्युः

मध्य-प्रदेशस्य धार-मण्डले बुधवासरे सायंकाले कर्मकारैः पूरितस्य 'पिकअप' यानस्य विपर्ययात् (पलटने से) द्वौ बालकौ सहितं चतुर्दश (१४) जनानां मृत्युः अभवत् । एषा घटना रात्रौ ८:३० वादने चिकलिया-स्थित-रिलायन्स-तैल-यन्त्रालयस्य समीपे घटिता । तस्मिन् याने ३०-३५ कर्मकाराः उपविष्टाः आसन्। अस्यां दुर्घटनायां दश जनाः गुरुतररूपेण आहताः अभवन्, येषां चिकित्सा सम्प्रति मण्डल-चिकित्सालये प्रचलति ।